अप्रैल: २०१८ ( वै. २०७४-७५ )
ISSN: 2347-1565
वैशाख कृष्ण प्रतिपदा तः वैशाख शु० पूर्णिमा पर्यन्तम्
मूल्यम् : २५ रूप्यकाणि

# संस्कृत-चन्द्रिका

## मासिकी संस्कृत-बालपत्रिका

वर्षम् - ५ अङ्कः - ९



सम्पादकः
डॉ० जीतराम भट्टः
सचिवः

ISSN : 2347-1565

मूल्यम् ₹ २५/- रूप्यकाणि

# संस्कृत-चन्द्रिका

## 'मासिकी संस्कृत-बाल-पत्रिका'

वर्षम्-५ अप्रैलः २०१८ अङ्कः-९

( वै० कृष्ण प्रतिपदा तः वैशाख शु० पूर्णिमा पर्यन्तम् वै. २०७४-७५ )

सम्पादकः

डॉ0 जीतराम भट्ट :

सचिवः

सहायकसम्पादकः

प्रद्युम्नचन्द्रः

दिल्ली संस्कृत अकादमी

( राष्ट्रिय राजधानी क्षेत्रम्, दिल्लीसर्वकारः )

DELHI SANSKRIT ACADEMY

(GOVT. OF N.C.T., DELHI)

**प्रकाशकः**

सचिवः

दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

प्लॉट सं०-५, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-११०००५

दूरभाषः - ०११-२३६३५५९२,२३६३७७९८

## सदस्यताशुल्कम्

| | | |
|---|---|---|
| प्रति-अङ्कम् | : | 25 रूप्यकाणि, $2.5 |
| वार्षिकम् | : | 250 रूप्यकाणि, $25.00 |

ISSN : 2347-1565

© दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

© Delhi Sanskrit Academy, Govt. of N.C.T of Delhi

शुल्कप्रदानप्रकारः

बैंकधनादेशः (डी०डी०), डाकधनादेशः (मनिआर्डर) अथवा सी०टी०सी० चैक माध्यमेन (**दिल्लीसंस्कृतअकादमीपक्षे** )

Mode of payment:

Demand Draft, Money order or by CTC Cheque

( In favour of "Delhi Sanskrit Academy")

E-mail Id : delhisanskritacademy@gmail.com

Website : www.sanskritacademy.delhi.gov.in

मुद्रकः

**एस.डी.एम. प्रिन्टर एण्ड पैकर**

हरिनगरम्, नव देहली-110064

मो. : 9811229529

# सम्पादकीयम्

जीवनोत्कर्षाय मानः स्वाभिमानो वा आवश्यकः किन्तु अभिमानः अहंकारो वापकर्षायैव भवति। उक्तञ्च-विद्या ददाति विनयं विनयाद्याति पात्रताम्। पात्रत्वाद् धनमाप्नोति धनाद्धर्मं ततः सुखम्।। यः विद्वान् भवति सः विनम्रो भवति। विद्वत्तायाः लक्षणमस्ति विनम्रता। श्रद्धावाँल्लभते ज्ञानम्। यस्य मनसि श्रद्धा भवति स एव ज्ञानार्जनं करोति। श्रद्धावान्नेव विनम्रोऽपि भवति। विनम्रतया यत्र योग्यतायाः विकासो भवति तत्रैव लोकेऽपि मानः प्राप्यते। अहंकारी जनः कस्मै अपि न रोचते। अभिमानी स्वस्य हानिस्तु करोति एव समीपस्थान् जनान्नपि उद्वेलयति। परिवेशे भयं ईर्ष्यां घृणाञ्च जनयति। ज्ञानेन कदापि अहंकारो न वर्धते। योऽहंकारी भवति सः ज्ञानी न भवति। यथोक्तं च- नमन्ति फलिनो वृक्षाः नमन्ति गुणिनो जनाः

शुष्कवृक्षाश्च मूर्खाश्च न नमन्ति कदाचन।।

येषु गुणाः न भवन्ति त एव शुष्कवृक्षाणां सदृशाः अनम्राः भवन्ति। ये तु गुणवन्तः विद्यावन्तश्च भवन्ति ते सर्वदैव नमन्ति। विद्यार्थिभिः विद्यार्जनाय सफलतायै च विनम्रतैवाङ्गीकरणीया। यतः विनम्रश्छात्रः सुयोग्यः भवति। संस्कृते योग्यः छात्रः योग्यः नागरिकः कथं भवितव्यः इत्यस्मिन् विषये विविधा उपायाः वर्णिताः सन्ति। अतः छात्रैः संस्कृतम् अवश्यं पठितव्यम्।

**सुमनसां प्रतिभाप्रतिभासिका**
**क्षितितलात्तमसश्च विनाशिका।**
**शिशुकिशोरयुवप्रियसाधिका**
**विजयते भुवि संस्कृत-चन्द्रिका।।**

**निवेदकः**
**डॉ. जीतरामभट्ट :**
**सचिवः**

क्र.सं. अनुक्रमणिका 'संस्कृत-चन्द्रिका'-५/९ पृ.सं.

सम्पादकीयम्

- डॉ० जीतराम भट्ट:

१. **वन्दिता सा धरा मेऽत्र भूमण्डले** ........................................१

- रक्षपाल सिंह यादव:

२. **अतिथिदेवो भव**..........................................................३

- डॉ० शिव प्रसाद त्रिपाठी

३. **मम माता**................................................................८

- डॉ० हेमचन्द्रबेलवाल: 'हिमांशु:'

४. **अनुशासितजीवनम्**.......................................................९

- श्रीमती सरला पटैरिया

५. **बालगीतम् (दक्षा पृच्छति)**..............................................१२

- परमानन्द शर्मा ''प्रमोद:''

६. **फेसबुकस्य अनारकली**....................................................१४

- डॉ० आशीष कुमार:

# वन्दिता सा धरा मेऽत्र भूमण्डले

- रक्षपालसिंहयादवः

यासु भाले हिमाद्रिः सदा राजते,
सिन्धुसेवारता नित्य शुभ्रैर्जलैः।
भाति यस्या सुकीर्तिः विशुद्धं भुवौ,
वन्दिता सा धरा मेऽत्र भूमण्डले।।

तीर्थराजं प्रयागं तु रामेश्वरम्,
बद्रिकाधाम श्रीधाम वृन्दावनम्।
नैमिषं काशिका यत्र द्वारावती,
वन्दिता सा धरा मेऽत्र भूमण्डले।।

सप्तभूराद्यरण्यानि सप्तानि वै,
द्वीपसप्तानि सप्तर्षयोः राजते।
यत्र सप्तार्णवाः सप्त शैलाचलाः,
वन्दिता सा धरा मेऽत्र भूमण्डले।।

जाह्नवी ब्रह्मपुत्रश्च गोदावरी,
नर्मदा गण्डकी कर्मनाशा पुनः।
आनदीभिर्जलैः या पवित्री कृता,
वन्दिता सा धरा मेऽत्र भूमण्डले।।

यत्र राणा शिवा खारवेलोऽभवन्,

विस्मिलोऽज़ाद अश्फाक दामोदर:।

मातृवत् देशभक्तै: सदांगीकृता:,

वन्दिता सा धरा मेऽत्र भूमण्डले।।

जीससा: मुस्लिमा: सिक्ख वै हिन्दवा:,

बन्धु भावे सदा यापितं जीवनम्।

किंचिदम् नैव दुर्भावना दृश्यते,

वन्दिता सा धरा मेऽत्र भूमण्डले।।

भारते जन्मलब्ध्वा कृतार्थोप्यहम्,

यत्र देदीप्यते ज्ञानदा भारती।

सृष्टित: विश्ववन्द्यास्ति मुक्तै:स्वैरै:।

वन्दिता सा धरा मेऽत्र भूमण्डले।।

-------------

-------------

-------------

# अतिथिदेवो भव

- डॉ० शिवप्रसादः त्रिपाठी

यस्मिन्समये भारतवर्षे आंग्ल शासनमासीत्। सम्भवतः 1943 ई० तत्समयस्य रूपरेखा इत्थमासीत्। साम्राज्य संचालनार्थं सुव्यवस्थां कर्तुं साम्राज्यं जमीदारी तालुकेदारी लघु नृप राज्य रूपेषु विभज्य शासनस्य स्वरूपं संचालितम्।

जमीदारः स्वजमीदारी रूपस्य शासकः तालुकेदारश्च स्वप्राप्ताधिकारेण तथा लघु नृपाः तथैव स्वराज्यं संचालयन्ति तथा कृषकैः प्राप्त लगान रूपे धनं संग्रह्य शासनं प्रेषयन्ति स्म। एतैः लघुशासकैः जनता उत्पीड़िता कष्टिता च आसीत्।

शासकैः लगान् रूपे रूपया प्राप्ति हेतौ उत्पीड़िनं कुर्वन्ति जनानाम्। यतोहि एतादशी मन्दी आसीत्। येन अन्नस्य मूल्ये लगान् प्रक्रिया पूर्णा न भवति लगान् प्रक्रिया अपूर्णत्वात् कृषकस्य कृषिं अपहरन्ति शासकाः। परन्तु ऐतादृक्परिस्थितौ अपि परस्परं सहयोग प्रेम समादरां इति संस्कार पूर्णजनाः अपरस्य मर्यादायाः ध्यानं विचार्य उत्सवेषु शोभाम् वर्द्धयन्ति। तथा आनन्दस्यानुभवान् वितरन्तिस्म्।

ईर्ष्या द्वेषयोः न्यूनता आसीत् तत् आसीत् तत् समयस्य वर्णनमस्ति।

एकस्मिन् ग्रामे दीनानाथनामकः ब्राह्मणः प्रति वसतिस्म। तस्य परिवारे द्वो पुत्रौ एकावधू आसन्। दीनानाथस्य पत्नी स्वर्गीया कमलवती आसीत्। पत्नी वियोगात् दुखानुभवन् जीवनस्य निर्वाहं करोतिस्म सः।

स्वल्पविद्याप्राप्तदीनानाथः परिवारे अनुशासनं संतोषं परस्पर प्रेम प्रवाहं कर्तु प्रयासशीलः दरीदृश्यते।

अल्प कृषित्वात् तत्कार्ये श्रम शीलत्वेऽपि दीनतायः जीवनं कष्टेन् यापयति। द्वौ पुत्रौ कृषि कार्ये परिश्रमं कृत्वा जीवनयापनं परिवारस्य पालनं पोषणं कुर्वन्तौ पितरं प्रसादयतः।

अतिथिसत्कारस्य ध्यानं दत्वा स्वधर्म परि पालयन्ति सर्वे।

त्रीणि धेनवः अतः दुग्धः दधि घृतस्य च व्यवस्थया सर्वे स्वस्थाः एवं निरोगिणः आसन्।

एकदा वर्षाधिक्यात् कृषौ मक्का, ज्वार, बाजरा, मुद्ग, माषादिकानामुत्पादं शुन्यमासीत्। अतः भोजनव्यवस्था जीर्णा बभूव। पूर्वान्नं स्वल्पमासीत् तद्न्नमपि समाप्त प्रायः आसीत्।

परन्तु दीनानाथः कथयति-श्री कृष्णः नारदं वदति-अतिथिसेवा विषये यः सज्जनव्यक्तिः साधवश्चः स्व पुण्य प्रभावेनैव गृहे आगच्छन्ति। आगमने वर्तमानस्य वातावरणं पुण्यमयं भवति तथा अतिथि यदा प्रत्यागच्छति सेवया प्रसन्नस्य अतिथेरात्मा स्वयमेव आशीर्वादैः परिपूर्णयति एवं अतिथिः गृहस्थस्य भूत वर्तमान भवष्यिंच प्रकटयति।

श्री कृष्णंः नारदं महामुनिं कथयति-

**हरत्यघं सम्प्रति हेतु रेष्यतः।**
**शुभस्य पूर्वाचरितैः कृतं शुभैः॥**
**शरीर भाजां भवदीय दर्शनं।**
**व्यनक्ति कालत्रितयेऽपि योग्यता॥**

एकदा दीनानाथः स्वद्वारे उपविष्टः स्वदीनदशां प्रति विचारमग्नरासीत्। वर्षाधिक्यात् खरीफ कृषि जातान्नानां मक्का, ज्वार, बाजरा, काकुन इत्यादिकानामुत्पादनं नष्टोऽभूत्। स्वल्प शालेरुत्पादनं अभूत्। तद् समाप्तप्रायः पश्यन् परिवारस्य पालनपोषणं कथं भविष्यति।

जमिदारस्य लगान् शुल्कमविदेयम्। हे भगवन् मम परिवारस्य कथं निर्वाहं भवेत्। यद्यपि धेनूनां दुग्धेन बहुसहयोगं भवति कष्टमिदमस्ति पशुनामपि उदरपोषणस्य व्यवस्था नास्ति।

वर्षाधिक्यात् शुष्कद्रवश्च पशुभोजनं नास्ति द्वारस्य छादनमपि जीर्णत्वात् वर्षाजलं च्यवति। गृहे कक्षद्वयजीर्णं अंगणे एकजीर्णकूपः तद्सन्निकट छादनमपि जीर्णं भित्तयरपि जीर्णाः। प्राचीन जीर्णवस्त्रैः परिवारस्य लज्ज अवशिष्टा। विस्तराणां स्थानं पुवालस्य

बहुसारथी आसन् तस्मिन् समये ग्रामस्य जमीदारः पूरनसिंहस्यागमनमभूत्। मध्याह्न कालस्य समयमासीत्। ग्रीष्म प्रभावेन स्वेद लिप्त पूरनसिहं दृष्ट्वा दीनानाथः सोत्साह मुत्थित्वा स्वागतं चकार। खट्वामुपरि जीर्ण विस्तरं प्रसार्य उपावेशयत् जमीदारम्। गूडेनसह जलं पाययत्। ग्रीष्माक्रान्त पूरनसिंहः विशश्राम। वंशखण्डनिर्मित व्यजनेन जमीदारोपरि वायुसंचालन कर्तुमुद्यतं दीनानाथं कथयति पूरनसिहः भो दीनानाथ! भवत्सेवामह्यणः भवत्सेवामह्यमनुचितम् इत्युक्त्वा व्यजनं नीत्वा स्वयम् प्रयोगं कुर्वन्नासीत्। व्यजनस्यनिर्माण कलामवलोक्य चित्र-विचित्र वस्त्र खण्डैः निर्मित पुष्पाच्छादित व्यजनं केन निर्मितं इतिपप्रच्छ।

दीनानाथेनोक्तम् मम वधू गृहकार्ये कुशली अस्ति। तयाएव खर्जूर दलैः उपवेशनाय चटाई अपि निर्मिता।

पूरनसिंहः विचारयति यदि निर्धनोऽपि कलां प्रयुज्य साधारण वस्तुअपि सुंदर रूप दातुं शक्नोति। दीनानाथेन प्रसाद रूपेण प्रदत्त गुडं खादित्वा जलंच पीतवा स्वयष्टिकामुत्थाय गन्तुमिच्छति।

दीनानाथेनोक्तं-सर्वकार महोदय मध्याह्नकालः अतः भोजनं कृत्वा एव गन्तव्यम्। भोजन निर्माणं स्वल्प काले एव भविष्यति। पूरनसिंहः जानातिस्म् यत् दीनानाथस्य गृहव्यवस्था वरं नास्ति अतः गंतव्यमेव।

परन्तु दीनानाथस्याग्रहं स्वीकृत्य परीक्षण-दृष्ट्या विशश्राम दीनानाथः गृह गत्वा वधूमवदत्-जमीदार महोदयः आगतः मध्याह्नकालत्वात् भोजनाय मया कथितम्। इति श्रुत्वा साश्रुमुखी वधू कथयति भो पितः। गृहे अन्नादि स्वल्पमपिनास्ति अति कठिनी समस्या। इत्याकर्ण्य दीनानाथः वदति जमीदारः गमनं करोतु। वधू कथयति क्षुधितातिथेः गमनं नोचितम्, भवान् तु बहिः वार्तालापं करोतु अहं तु विचारयामि। विलम्बमवश्यमेव भविष्यति। वधू अन्न-भण्डारिकां उद्घाट्य ददर्श भगवत् कृपया तस्मिन् 2,3 द्वि, त्रि किलो शालिं प्राप्तम्। वधू शालिं संकुट्य चावलं निष्कास्य पृष्ठद्वारात् निर्गत्य प्रतिवेशी विपणात् चावल स्थाने गोधूमचूर्णं तथा अन्यावश्यक सामग्रीं क्रीत्वा आगता परन्तु सब्जी न आसीत्। तत्काल बुद्धौ विचार्य अंगणस्थितकूपोपरिनिर्गतदूर्वाघासं लघु खण्डेषु

संकर्त्य गोधूम चूर्णे संल्लिप्य पकौड़ी निर्मीय ओदनं द्विदलमपि सब्जी च निर्मिता बध्वा। भोजनार्थं जमीदार महोदय: आहूत: दीनानाथ: गृहे बिना व्यवस्था भोजनं दृष्टवा चाक-चक्य: अभूत्। दीनानाथेन जमीदार पूरनसिंहं अंगणे आनीय चटाई विस्तरोपरि उपावेशयत् भोजनप्रक्रियासम्पूर्णा चकार।

पूरनसिंह: आश्चर्य चकित: विचारयति। बिना अन्नव्यवस्था सुस्वादु भोजनं कथं निर्मितम् जीवने नास्ति इदृक् सुस्वादु भोजनं मया न कृतम्।

दीनानाथं पृच्छति भो पंडित: भोजन निर्माण विषये मम जिज्ञाया शान्त्यर्थ वधूं आह्वय।

आगतवधूं पृच्छति जमीदार:। गृहे अन्नादि व्यवस्था नास्ति कथं भोजनव्यवस्था कृता भवत्या शालि कुट्टन शब्दं तु श्रुतं मया अग्रेत्वम् स्पष्टं कुरु।

वधू दीनवाण्या साश्रुमुखी विस्तारेण वदति। वर्षाधिक्यात् अन्नस्योत्पादनं न अभवत्। पूर्वसंचितान्नं विक्रीयलगान् शुल्कं अददत्।

महोदय सर्वशून्यं दरिद्रता पश्चात् भोजन निर्माण प्रक्रिया मुक्त्वा प्रक्रिया मपि अवदत्। वध्वो: धैर्यं बुद्धिमत्तां चातुर्यमवलोक्य पूरन सिंह: अवोचत्।

हे दीननाथ! तव वधू अतिथि सेवायां या बुद्धिमत्ता धैर्यं समादरभावं भोजनपूर्ति हेतुं गृहे अव्यवस्थायां व्यवस्थित भोजननिर्माणकलां प्रदर्शिता अत: अतिप्रसन्नोऽस्मि।

अत: तव दरिद्रतां दूरी करणाय अद्यत: एतद् ग्रामं मया प्रदतं तस्य वधू स्वामिनी स्यात् अत: अस्यग्रामस्य मालगुजारी रूपेण यत्शुल्कं तदसर्वं भवत: भविष्यति तथा एतद्ग्रामस्य नाम अद्यत: बहुपुरा भवष्यिति। तथा अन्य सल्लग्न ग्रामाणां एषा शासिका भविष्यति इति श्रुत्वा दीनानाथ: कृपां मत्वा पूरनसिंहाय भूरि भूरि अर्शीवादा: प्रददत्।

पूरन् सिंह: दीनानाथस्य दरिद्रतां दृष्ट्वा विचारयति धनहीनव्यक्ति: अत्यन्तदु:खमय जीवनं प्राप्नोति। अद्यत: धनहीनविकलांगमानवानां सहायतां करिष्यामि तथा तान् ताडनं तर्जनं कदापि न करिष्यामि। पूरनसिंहस्य स्वभावे परिवर्तनमभूत्। चिन्तयति- धनहीनव्यक्तिहृदये ईश्वर: वसति अत: तं दरिद्रनारायण: इति कथयन्ति। नारायण

त्रय:-नारायण: सूर्यनारायण: दरिद्रनारायण:।

दीनस्य सेवा एव वास्तविक पूजा अस्ति। यदि दीन: दानस्य ग्रहणं करोति तत्तु दानदातु: भविष्यं रचयति। एतद् घटनाया: प्रभावात् दीनानाथस्य द्वौ पुत्रौ अपि परोपकारं कर्तुं विचारयत: तथा किञ्चित् अन्नेन किञ्चित् दुग्धेन किञ्चित् अन्य सहयोगेन उपकुरुत:।

लिखिञ्च

**स्वयं न खादन्ति फलन्ति वृक्षा:**
**पिबन्ति नद्य: स्वयेमव नाम्भ:।**
**नादन्ति सस्यं खलु वारिवाहा:**
**परोपकाराय सतां विभूतय:॥**

**-सी- ३५०४ त: ०६**
**सपना कालोनी, राजाजीपुरम्**
**लखनऊ, उत्तर प्रदेश - २२६०१७**

# मम माता

– डा0 हेमचन्द्रबेलवालः 'हिमांशुः'

जागर्ति प्रत्यूषे सा
दिने करोति न विश्रामम्,
सदैव निजकार्ये लग्ना
सुखयति लोकं मम माता।।

अल्पाहारं प्रातःकाले
पचति मदर्थं मम माता,
चायं दत्त्वा सर्वेभ्यो
गेहं शुध्यति मम माता।।

करोति गृहकार्यं सर्वं
वस्त्रं क्षालयते मम सा,
गृहसम्मानं वर्धयते
कुशला गृहिणी मम माता।।

सोढ्वा नित्यं दुःखानि
सुखानि यच्छति सर्वेभ्यः,
वृद्धजनानां सेवां कृत्वा
सदा प्रसन्ना मम माता।।

श्रेष्ठचरित्रा सीता सा
बुद्धिमती सा सरस्वती,
मां पाठयति निरन्तरं
कष्टहारिणी मम माता।

**सहायकाध्यापकः, संस्कृत**
**रा०उ०मा०वि० घसाडः**
**पो० विनायक (मुवानी)**
**जिला पिथौरागढ, उ०ख०**

# अनुशासितजीवनम्

- श्रीमती सरला पटैरिया

**वर्णानामर्थसंघानां रसानां छन्दसामपि**
**मंङ्गलानां च कर्तारौ वन्दे वाणी विनायकौ।**

प्रंसग- अस्मिन् कथा प्रसंगे महान् पुरुषाणाम् चरित्राणां आचरणं अनुकरणीयं इति उद्देश्यः अस्ति। बाल्यावस्थां गुरुणां आज्ञां पालयितुम् महापुरुषः प्रयत्नशीलः एव सन्ति। शुभ-संस्कारेण जीवन-पर्यन्तम् महान-विभूतयः स्व-श्रद्धा-बुद्धया आश्चर्यपूर्णानि कार्याणि अकुर्वन् प्रतिष्ठाम् आप्नुयात्। विश्वे अद्यतनात् तेषां कीर्त्तिः चिरस्वरूपेण स्थापितः।

वर्तमान समये सर्वे छात्राः महापुरुषस्य जीवनात् शिक्षां पालयन प्रयत्नशीलः भवन्तु।,

**कथा-**

छाया निवृत्तचित्तनाम् स्प्रहाभतिः कश्चित् अनुवृत्तः नाम राजा कृष्ण भक्तिं अकरोत्। स राजपुत्रः परम भागवतः गुरु-सेवया दीक्षिष्यमाणः अवनितल परिपालनाय स्व-पितृ-रूपां मंत्रित भगवति वासुदेवे एव अव्यवधान समाधि-योगेन समाविशतः आत्मान्।

**यस्य देवे परभक्तिः यथा देवे तथा गुरौ,**
**तस्यैते कश्चिताः ह्यार्थाः प्रकाशन्ते महामताः॥**

समाधियोगान्ते स राजपुरुषः ईश्वरस्य आज्ञाया समविहितः आत्मनः लघुतया अवनत शिरोधरः बाढ्म इति स बहुमानम् उवाह। युवावस्थां प्राप्तं अनुवृत्तेः जगती पतिः ईश्वर-इच्छया अधिनिवेशित कर्म अधिकारः अखिल-जगत-बन्ध-ध्वंसन् परानुमास्थ भगवतः अंघ्रि आदिपुरुषस्थ अनवरत ध्यान अनुभावेन महीतलम् युगल अनुशशास।

अथ तत्पश्चात् राजा अनुव्रत एका कन्यां विवाहं अकरोत्। विवाहोपरांतः स एकदा अचिन्तयत् एवम् अपरिमित्त-बलपराक्रमः प्राप्तवान् तु गुण निर्वेदः इदम् आह।

**त्यक्त्वा स्वर्धम् चरणाम्बुजम् हरेर्भजन्नपक्वोथ**

किन्तु उपयुक्त अवसर प्राप्ते पुनः पतेत्ततो यदि।

सफलं आप्तो। पुनः पुनः अविद्या अपि अचिन्तयत् अहो! असाधुं अनष्ठिम् यत् अभिनिवेशितः इन्द्रियैः अविद्या-रचित विषय अंधकूपे तत् अलं अलं अमुष्याः वनितायाः विनोद मृगम् माम् धिक्-धिक् इति गर्हयाम् चकार स्वल्पम् अपि अनुव्रतः आत्मचिन्तम् अकरोत् भगवत् सेवया महतो अनिष्ट-भयात् त्रायते। अतः पुनः इन्द्रिय सुखानां विरक्तो भूत्वा देवता-प्रसाद अधिगत आत्मसाक्षात्कारेण सर्वेषां भोगां अपहाय स्वयं निहित निर्वेदः हृदि गृहीत। हरि-विहार अनुभावः पदवीं पुनः एव अनुससार।

भगवानः स्वतः उपदेशेन प्राह-

**मन्मनाभव मद्भक्तो मद्याजी मां नमस्कुरु।**

**चैतन्य महाप्रभुः एव उपदेशे प्राह-**

**न धनं न जनं न सुन्दरीं वा जगदीश कामये।**

**मम जन्मनि जन्मनि ईश्वरे भवतात् भक्तिः अहैतुकीः त्वयि।**

राज्ञः भगवत्-भक्तिं प्राप्तुम् अनेकानि सुनियोजित कर्माणि क्रियताम्। भक्तिमार्ग सम्प्रवृत्ते प्रजाः औरस-व्रत धर्म अवेक्षमाणः अपालयन् प्रजानां सुखानां हेत्वर्थे अनेकानि आयोजनानि अक्रियताम्। बुद्धि शील-रूप-वयः-श्रियाः औदार्येण इत्यादिः गुणान् संयुक्तेनापि स राजवरः मनाः न पराक्षिप्तः भोगात्।

तस्य एकः पुत्रः आसीत्। सः गुणवान् धैर्यवान् च सदाचारिणः न आसीत्। यथोचित् कर्म पालनाय अक्षमः जातो। तस्य पुत्रः नाम अभद्रमूर्तिः आसीत्। नामरूपेण अभद्रमूर्तिः दोषपूर्णानि कार्यणि अकरोत्। अर्धामिकः सः शरासनम् उद्यम्य मृग्युः असाधुः दीनान् मृगान् इव हन्ति। अक्रीडतः वयस्यान् बालान् अति दारुणः असध्य निरनुकोशः अमारयत्।

नृपः तं स्व खल पुत्रं विचक्ष्य विविधैः शासनैः न शासितुम् कल्पः भ्रशम् आसीत्। प्रायेण पुत्रहीनाः गृहमेधिनः दुखम् न विन्दन्ति इति राजा अविचारयत्। अस्मात् कारणात् पुत्र विहीनाय दुर्धरम् दुखं न भवेत् । यतः कीर्त्तिः धर्मः च तस्य महानि नृणाम न नश्यन्ति। कुपुत्रात् गृहस्थ जीवनः नर्कतुल्यः भवन्ति। पंडितो बहुमन्येत यदर्थाः क्लेशात् गृहः।

एवं निर्विण्ण मनाः नृपः गृहात् निशीथे उत्थाय महा-उदय-उद्यात्

अलब्ध निद्रः अनुपलक्षितः जनाः हित्वा गतः। राजवरं गतम् इति विज्ञाय अति शोककातरः अभवन्, अलक्ष्यन्तः हत-उद्यमाः प्रजाः ऋषीन समेतान् भर्त्र अनुपस्थितेन तस्य गुणहीनाः अक्रूरः पुत्रान् राजसिंहासने अभ्यसिंचन। नृपासनगतं श्रुत्वा दस्यु अद्यः स्वां भूमिगतौः अभवन्। आरूढनृपस्थान स्वतः सम्भावितः अत्यन्त घमंडी-अभवन्। स महापुरुषानां अपमानं कृतवानृ। धर्मम न्यवारयत् अराजक-भयात् विद्वान्-पुरुषाः पंडिताः च ऋषयः सर्वे प्रजाजनाः भयभीतः आसीत्। ते विचारयन्- ''अहः इव पयः पोषः पालकस्य अपि अव अनर्थः भ्रत।''[8] प्रजापालनाय अमुं अस्मान् राजान् निरूपित। अस्माभिः कृतः नृपः न प्रजापालकः अस्ति। असत्-वृत्तः राजा लोके-धिक् कारकः भवति। एवं अध्यवसाय गूढ़मन्यवः ऋषयः समीपे धर्मानुसारेण शासनम् करणाय अब्रुवन्- भोः विज्ञापयाम्-श्रीबिल-कीर्तिनाम् च तात विवर्धनम्-त्वं धर्माचरणाय आचरणम् कुरु। अस्मिन् समये सर्वे जनाः न शान्ति-सुखं अनुभवम् न क्रियन्ते। धर्म आचरितः पुंसां वाक्-मन-बुद्धिभिः लोकान् विशोकान् वितरति। स ते मा विनशेत् प्रजानां क्षेम-लक्षणः। यस्मिन् विनष्टे नृपतिः ऐश्वर्यात् अवरोहति।

**स राजा उवाच**- बालकाः वत यूयम् वा अधर्मे धर्ममानिनः ये वृत्तिदम् पतिम् हित्वा अधर्मम् उपासते। अमी अवजान्नति मूढ! नृपरूपिणम् ईश्वरम् तेन अनुविन्दन्ति भद्रं इह लोके परत्र च विप्राः। तस्मात् गत-मत्सराः मह्यम् यजध्वम्।

यस्यनास्ति स्वयं प्रज्ञा शास्त्रम् तस्य करोति किम् विद्वानः कथितः। इत्थं विपर्यम-मतिः पापीयान् अनुनीयमानः तत् प्रार्थनां न चक्रे। तदुपरान्ते ते ऋषयः तं नृपाय श्रापं अददात्। कश्चित समयोपरान्ते अभद्रमूर्तिः नाम राजानम् तस्य प्रजाभिः ताम् अमन्यमानं च आदिशन् कृत्वा तम् कारागारे निक्षिप्य मृत्यदंडम् च आदिशन्। अतः एतद् कथयतः-''सदा अनुसासनप्रियः सदाचारिणः निष्ठावानः च भूयात्।''

८

**- पूर्व प्राचार्या, शा. उ. मा. वि.**
**ए-७८, तृतीय तलम्,**
**राधेश्यामपार्क विस्तारः,**
**नव देहली-११००५१**

# बालगीतम्
# दक्षा पृच्छति

– परमानन्द शर्मा ''प्रमोदः''

दक्षा पृच्छति शृणु भो भ्रातः।
उदयति सूर्यः कथं च प्रातः।।
रात्रौ गच्छति कुत्र प्रकाशः।
दिवसे कथं तमस्रो नाशः।।

कथं वर्धते शीताघातः।
कथं च प्रवहति आतपवातः।।
मेघः कथं प्रवर्षति नीरम्।
ज्ञातुमेतत् चेतोऽधीरम्।।

भ्राता वदति च शृणु भो दक्षे!
पृथिवी घूर्णति नित्यमक्षे।।
तेन च दिवसः क्रमशो रजनी।
दिवसे भवति प्रकाशितावनी।।

रात्रौ तमः विवर्धते लोके।
गच्छति विश्वं तस्मिन् शोके।।
द्वादशमासा भवन्ति दक्षे।
भ्रमति यदा पृथिवी निजकक्षे।।

तस्मिन् वर्षाशिशिरवसन्ताः।
ग्रीष्मशरत्पुनरपि हेमन्ताः।।
वर्षे षड् ऋतवः आयान्ति।
क्रमशो मासद्वयं प्रतिभान्ति।।

उत्तरायणे तपति च भानुः।
दीर्घा दिवसा ज्वलति कृशानुः।।
दक्षिणायने भ्रमति दिनेशः।
वर्धते शीताघातो ह्येषः।।

वाष्पं भूत्वोद्गच्छति नीरम्।
गगनमण्डले धरति शरीरम्।।
वर्षाकाले गर्जति मेघः।
वर्षति मधुरं नीरमशेषम्।।

तेन जीवनं सृष्टिविकासः।
भवति पृथिव्यां नव उल्लासः।।
एवं सृष्टेर्नवसंरचना।
श्रुत्वा दक्षा निद्रामग्ना।।

**- श्री मथुराधीश मन्दिरम्,**
**चमना बावड़ी शाहपुरा**
**जिला- भीलवाडा**
**राजस्थानम्-३११४०४**

# फेसबुकस्य अनारकली

-डॉ० आशीष कुमार

**सूत्रधारः** - अद्य बसन्त-पञ्चम्याः उपलक्ष्ये, दिल्ली विश्वविद्यालयस्य राजधानी महाविद्यालये, एकस्य हास्य-नाटकस्य मञ्चनं भविष्यति। अस्य नाटकस्य रचयिता अस्माकम् महाविद्यालयस्य प्राध्यापकाः श्री आशीष कुमार महाभागाः सन्ति। नाटकस्य विषयः वर्तते यत् यदि अकबर-बीरबलस्य कालेऽपि फेसबुक, वाट्सैप इत्यादि अभविष्यन् तर्हि अनारकली-सलीमस्य प्रेमव्यापारस्य कीदृशी दशा अभविष्यत्?

**- "फेसबुकस्य अनारकली" -**

**बीरबलः** - अहम् राजानम् मिलितुम् इच्छामि।

**सेविका** - कृपया प्रतीक्षां करोतु महोदय!

**सेविका** - (राजा अकबरं प्रति) राजन्! मुख्यमन्त्री बीरबलमहाभागः भवन्तम् मिलितुम् इच्छति।

**अकबरः** - सः आगन्तुम् शक्नोति।

**सेविका** - महोदय! कृपया आगच्छतु।

**बीरबलः** - अस्सलाम आलेकुम, महाभागाः।

**अकबरः** - आले कुम अस्सलाम बीरबल। किम् अभवत्, भवान् बहु चिन्तितः दृश्यते।

**बीरबलः** - मम चिन्तायाः कारणम् भवतः पुत्रः अस्ति। अस्माकम् राज्यस्य राजकुमारः।

**अकबरः** - किं कथयति भवान्। मम पुत्रः सलीमः? सः किं कृतवान्।

| | | |
|---|---|---|
| बीरबलः | - | मम स्वामिन्! सः एकस्याः कन्यायाः प्रणये अपतत् तथा सा कन्या अत्यन्त निर्धना अस्ति। |
| अकबरः | - | किम्? सा का अस्ति? सा किं करोति? |
| बीरबलः | - | स्वामिन्! तस्याः नाम अनारकली अस्ति। सा एकस्मिन् कॉल सेन्टरे कार्यं करोति तथा एकस्मिन् झुग्गी मध्ये निवसति। |
| अकबरः | - | कथं भवान् कथयितुं शक्नोति यत् सः ताम् प्रेमं करोति? |
| बीरबलः | - | मम पार्श्वे प्रमाणानि सन्ति। अहं सलीमस्य फेसबुकअकाउन्टं हैकं कृतवान तथा अनारकलीं प्रति तस्य सन्देशान् दृष्टवान्। |
| अकबरः | - | (जोधां प्रति) भो जोधा! भवती अस्मिन् दूरदर्शने किं नाटकं पश्यति। ततो दीर्घ नाटकम् अस्माकम् गृहे प्रचलति। |
| जोधा | - | किम्! किदृशं नाटकम्? |
| अकबरः | - | भवत्याः पुत्रः अस्य नाटकस्य नायकः अस्ति। |
| जोधा | - | नाटकम्! किम् नाम तस्य नाटकस्य तथा कस्मिन् चैनले कति वादने आगच्छति? |
| अकबरः | - | भो भार्ये! एतत् भवत्याः दूरदर्शनस्य नाटकं न अस्ति, अपितु वास्तविकं नाटकम् अस्ति अपि च भवत्याः पुत्रः एव मुख्य-भूमिकायां अस्ति। |
| जोधा | - | मम प्रिय-पुत्रः किम् अकरोत्? |
| अकबरः | - | सः एकं निर्धनां कन्यां भवत्याः राजप्रासादस्य सम्राज्ञीं कर्तुम् इच्छति। |
| जोधा | - | या अल्लाह! मम प्रिय-पुत्रेण सह किम् अभवत्? निश्चित-रूपेण सा राक्षसी मम पुत्रस्य उपरि कृष्ण-इन्द्रजालस्य प्रयोगं कृतवती। |
| अकबरः | - | आम्। भवती सम्यक् कथयति। |

अकबरः - (सेविकां प्रति) सलीमं आह्वयतु।

सेविका - यथा आज्ञापयति।

सलीमः - आदाब पिताश्री! किं कर्तुं शक्नोमि अहं भवतां कृते?

अकबरः - अहम् एतत् किं श्रृणोमि, भवतः सन्दर्भे, यत् भवान् एकां निर्धनां-कन्यां प्रेम करोति, तस्याः नाम अनारकली अस्ति?

सलीमः - अहम् तु छिपकलीम् अपि न दृष्टवान्, भवान् कथयति अनारकली! न पिताश्री! एतत् पूर्णतः असत्यम् अस्ति।

अकबरः - सलीम! असत्यं मा वदतु। बीरबलः भवतः फेसबुकस्य सन्देशान् दृष्टवान्।

सलीमः - किं कथयति! एतत् असम्भवं अस्ति।

अकबरः - बीरबलः भवतः फेसबुक-अकाउन्टं हैकितवान्।

सलीमः - किम्? सः किमर्थम् हैकितवान्?

अकबरः - एतत् भवतः विषयः नास्ति। उत्तरं ददातु एतत् सत्यं मिथ्या वा?

सलीमः - आम् पिताश्री! एतत् सत्यम् अस्ति, अहं ताम् कन्यां प्रेम करोमि, परन्तु सा अत्यन्त सुन्दरी उष्णी च।

अकबरः - किम् उष्णी?

जोधा - उष्णी? किम् उष्णी?

अकबरः - उष्णी आसन्दिका, कः भविष्यति करोडपतेः उष्णी आसन्दिका, अपितु उष्णी-चायस्य निर्माणं करोतु।

सलीमः - आम् पिताश्री! सा उष्णी परन्तु भवान् अत्यन्त शीतलः अपि च वृद्धः, तस्मात् मर्यादायाः पालनं करोतु। अहं तया सह विवाहं कर्तुम् इच्छामि।

अकबरः - सम्यक् अस्ति। इदानीं भवान् गच्छतु।

सलीमः - सम्यक्। गच्छाम्यहम् परन्तु भवान् मम विषयेऽपि चिन्तयतु।

अकबरः - (बीरबलं प्रति) बीरबल! अहम् अनारकलीं मिलितुम् इच्छामि। इदानीम् एव।

बीरबलः - यथा आज्ञापयति। अहं ताम् आह्वयामि।

**( अनारकली बीरबलं च प्रविश्य )**

अनारकली - नमो नमः पिताश्री! भवान् कथम् अस्ति?

अकबरः - भवती माम् 'पिताश्री' कथं कथयितुं शक्नोति?

अनारकली - यतः भवान् मम श्वसुरः अस्ति।

अकबरः - किम्? कः उक्तवान् एतत्?

अनारकली - सलीमः, मम बॉयफ्रैन्डः।

अकबर - (जोधां प्रति, कर्णे) भवत्याः कः विचारः अनारकली विषये? सा परमसुन्दरी अपि च कॉल सेण्टरे कार्यं अपि करोति।

जोधा - सा सुन्दरी अस्ति, तथा मॉडल सदृशी दृश्यते। मम दृष्टया सा मम पुत्रस्य कृते उत्तमा अस्ति।

अकबरः - (अनाकरलीं प्रति) आम् सम्यक् अस्ति। श्वः भवत्याः अङ्गुलीयक-परिवर्तन-समारोहः भविष्यति। अतः भवती मातृ-पितृभ्यां सह आगच्छतु।

अनारकली - (सस्मितम्) धन्यवादः! श्वः मेलनं भविष्यति। पुनर्मिलामः।

**- अग्रिमे दिवसे -**

सूत्रधारः - श्रृण्वन्तु! श्रृण्वन्तु! श्रृण्वन्तु! सर्वेषाम् कृते सूचना अस्ति, यत् अद्य अस्माकं राजकुमारस्य अङ्गुलीयक-परिवर्तन-समारोहः अस्ति।

भवन्तः सर्वे आमंत्रिताः सन्ति।

**- ( अनारकली तस्याः माता पिता च प्रवेशं नाटयन् ) -**

**अनारकली** - (प्रासाद मध्ये) अहा! अति सुन्दरं राजभवनम् वर्तते एतत् सज्जीकरणं मम कृते अस्ति।

**माता** - या अल्लाह! अहं तु कदाचित् न चिन्तितवती, एतत् सदृशं राजभवनं मम पुत्र्याः कृते। बहु शोभनम् मम पुत्री! भवती अत्यन्तं प्रशंसनीयं कार्यं कृतवती।

**बीरबलः** - (करतलध्वनिः) जहाँपनाह! समारोह-प्रारम्भ-कर्तुम् आज्ञापयतु।

**अकबरः** - आम। प्रारम्भं करोतु। (अनारकलीं प्रति) अनारकलि! कृपया सलीमेन सह अङ्गुलीयकं परिवर्तनं करोतु।

**- ( अनारकली तानसेनं प्रति गच्छति ) -**

**तानसेनः** - किं करोति बालिके? अहं तु तानसेनः अस्मि, सलीमः न।

**अनारकली** - न, भवान् एव मम सलीमः, दीर्घः, कृष्णः, सुन्दरः च।

**तानसेनः** - सः सलीमः वर्तते देवि। अपि च भवत्याः विवाहः तेन सह भविष्यति, मया सह न।

**अनारकली** - सः सलीमः अस्ति? छी! परन्तु अहं तु भवतः चित्रं दष्टवती फेसबुक उपरि।

**अकबरः** - (सलीमं प्रति) एतत् किमस्ति सलीम! एतत् किम् दुविधा वर्तते? भवान् किमपि अनुचितं कृतवान् खलु?

**जोधा** - वदतु, मम पुत्रः, वदतु! सा किमर्थम् एतत् कथयति?

**सलीमः** - आम् पिताश्री! मम एव त्रुटि अस्ति। अहम् एकं कपट-नाटकम् कृतवान्। अहं तानसेन महोदयस्य चित्रं मम फेसबुक-प्रोफाइल-चित्र-रूपे प्रयोगं कृतवान्। कन्यानाम् आकर्षणाय।

बीरबलः - भो राजन्! अहं तु पूर्वमेव सर्वं जानामि स्मः। यदा अहं सलीमस्य अकाउन्टं हैकं कृतवान् तदा अहं सलीमस्य फेसबुक अकाउन्टे तानसेन-महोदयस्य प्रोफाइल चित्रं दृष्टवान्। परन्तु मम इच्छा आसीत् यत् यदि राजकुमारः सलीमः स्वमुखात् स्वत्रुटिं स्वीकरिष्यति तर्हि एव सम्यक् भविष्यति। तस्मात् कारणात् अहं भवताम् पूर्ण-सत्यम् न अवदम्।

अनारकली - परन्तु, अहं तेन सह विवाहं कर्तुं न इच्छामि। अहं तु तानसेनेन सह विवाहं कर्तुम् इच्छामि। मम सुन्दरः गायकः। मम रॉकस्टारः! किम् भवान् मया सह विवाहं करिज़्यति?

तानसेनः - निश्चितरूपेण। अहं भवत्या सह विवाहं करिष्यामि। मम रसगोलकम्!

सलीमः - (अनारकलीं प्रति) अनारकलि! यदि भवती मया सह विवाहं करिष्यति, तर्हि भवती अत्यन्त-धनी भविष्यति।

अनारकली - परन्तु यदि अहं तेन सह विवाहं करिष्यामि, अहं प्रसन्ना भविष्यामि।

**( अङ्गुलीयक-परिवर्तन-समारोहः गीतं च नेपथ्ये ) ( छोड़ छाड़ के अपने सलीम की गली )**

अकबरः - (सलीमं प्रति) भवान् अत्यन्त-घृणित-कार्यं कृतवान्। अपि च यत् भवान् कृतवान् तत् गम्भीर-सायबर-अपराध-श्रेण्याम् आगच्छति। भवान् अपराधस्य दण्डं अपि प्राप्स्यति।

सलीमः - इदानीम् अपि दण्डः? मम प्रेमिका माम् त्यक्तवती, तथा भवान् माम् दण्डं ददाति?

अकबरः - आम्। यतः एतत् घोर-अपराधः अस्ति। तस्मात् भवतः दण्डः अस्ति यत् भवतः सर्वाणि विद्युत-उपकरणानि यथा-जङ्गमदूरवाणी, आइ-पैडः, लैप-टापः, अन्तर्जालं, सङ्गणकम्, फेसबुक, वॉटसैप इत्यादि भवतः दूरं भविष्यति, एक-वर्ष-पर्यन्तम्।

सलीमः - न पिताश्री! अहं तैः विना जीवितुम् न शक्नोमि। अहं मृत्युं प्राप्स्यामि।

अकबरः - एतत् भवतः समस्या वर्तते, मम पुत्र!

सलीमः - न पिताश्री न! एषः अन्यायः अस्ति। न पिताश्री। न।

**- ( सूत्रधारः दर्शकाणाम् प्रति ) -**

सूत्रधारः - पश्यतु, एतत् भविष्यति यदि भवान् अत्यन्तं चातुर्यम् करोति। फेसबुक-वाट्सैपः इत्यादि सोशल-मीडिया अस्माकम् ज्ञानवृद्धये, मनोरंजनाय, मित्रैः प्रेमव्यवहाराय भवन्ति, न तु अज्ञानविस्तारणाय, कपट-नाटकाय, जनानाम् मूर्ख-निर्माणाय भवन्ति। यदि कोऽपि ईदृशां कार्यं करोति तर्हि एतत् घोर-सायबर- अपराधः अस्ति। तथा सः दण्डं प्राप्नोति।

सलीमः चिन्तितवान्, सः कन्यां मूर्खनिर्माणं करिष्यति, समाजं व्यवस्थां च मूर्खनिर्माणं करिष्यति। स्व-मिथ्या प्रोफाइल-चित्र माध्यमेन। परन्तु इदानीम् तस्य स्वजाले एव बन्धनं अभवत्। कन्या अपि गतवती, फेसबुकः अपि गतवती। उभौ गतवत्यौ।

**( ना खुदा ही मिला, न बिसाले सनम।**

**न इधर के रहे, न उधर के रहे॥ )**

**- सहायक आचार्यः,**

**संस्कृत विभागः**

**राजधानी महाविद्यालयः ( दि०वि० )**

**नवदेहली- ११००१५**



RNI No.
DELSAN/2013/50379

प्रकाशक एवं मुद्रक सचिव, दिल्ली संस्कृत अकादमी के
स्वाामित्व द्वारा मै. एस.डी.एम. प्रिन्टर एण्ड पैकर,
हरिनगर, घण्टा घर, नई दिल्ली-64
से मुद्रित और दिल्ली संस्कृत अकादमी, प्लाट सं.-5,
झण्डेवालान, करोलबाग, नई दिल्ली-110005 से प्रकाशित।